# RitusanhAra (kAlidAsa)

# ઋતુસંહાર (કાલિદાસ)

## Document Information

Text title : Ritusa.nhAra (kAlidAsa)

File name : ritu.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Jost Gippert gippert at em.uni-frankfurt.de

Proofread by : Avinash Sathaye sohum at ms.uky.edu

Latest update : 1995, November 1, 2010

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 24, 2024

*sanskritdocuments.org*

# RitusanhAra (kAlidAsa)

# ઋતુસંહાર (કાલિદાસ)

॥ ૧ । અથ ગ્રીષ્મઃ ॥

પ્રચણ્ડસૂર્યઃ સ્પૃહણીયચન્દ્રમાઃ
સદાવગાહક્ષતવારિસઞ્ચયઃ ।
દિનાન્તરમ્યોઽભ્યુપશાન્તમન્મથો
નિદાઘકાલઃ સમુપાગતઃનિદાઘકાલોઽયમુપાગતઃ પ્રિયે ॥ ૧॥

નિશાઃ શશાઙ્કક્ષતનીલરાજયઃ
ક્વ ચિદ્ વિચિત્રં જલયન્ત્રમન્દિરમ્ ।
મણિપ્રકારાઃ સરસં ચ ચન્દનં
શુચૌ પ્રિયે યાન્તિ જનસ્ય સેવ્યતામ્ ॥ ૨॥

સુવાસિતં હર્મ્યતલં મનોરમં var મનોહરં
પ્રિયામુખોચ્છ્વાસવિકમ્પિતં મધુ ।
સુતન્ત્રિગીતં મદનસ્ય દીપનં
શુચૌ નિશીથેઽનુભવન્તિ કામિનઃ ॥ ૩॥

નિતમ્બબિમ્બૈઃ સુદુકૂલમેખલૈઃ
સ્તનૈઃ સહારાભરણૈઃ સચન્દનૈઃ ।
શિરોરુહૈઃ સ્નાનકષાયવાસિતૈઃ
સ્ત્રિયો નિદાઘં શમયન્તિ કામિનામ્ ॥ ૪॥

નિતાન્તલાક્ષારસરાગલોહિતૈર્
નિતમ્બિનીનાં ચરણૈઃ સનૂપુરૈઃ ।
પદે પદે હંસરુતાનુકારિભિર્
જનસ્ય ચિત્તં ક્રિયતે સમન્મથમ્ ॥ ૫॥

પયોધરાશ્ચન્દનપઙ્કચર્ચિતાસ્
તુષારગૌરાર્પિતહારશેખરાઃ ।

નિતમ્બદેશાશ્ચલહેમમેખલાઃ
પ્રકુર્વતે કસ્ય મનો ન સોત્સુકમ્ ॥ ૬॥

સમુદ્ગતસ્વેદચિતાઙ્ગસંધયો
વિમુચ્ય વાસાંસિ ગુરૂણિ સાંપ્રતમ્ ।
સ્તનેષુ તન્વંશુકમુન્નતસ્તના
નિવેશયન્તિ પ્રમદાઃ સયૌવનાઃ ॥ ૭॥

સચન્દનામ્બુવ્યજનોદ્ભવાનિલૈઃ
સહારયષ્ટિસ્તનમણ્ડલાર્પિતૈઃ ।
સવલ્લકીકાકલિગીતનિઃસ્વનૈઃ
પ્રબુધ્યતેવિબોધ્યતે સુપ્ત ઇવાદ્ય મન્મથઃ ॥ ૮॥

સિતેષુ હર્મ્યેષુ નિશાસુ યોષિતાં
સુખપ્રસુપ્તાનિ મુખાનિ ચન્દ્રમાઃ
વિલોક્ય નિર્યન્ત્રણમુત્સુકશ્ચિરં
નિશાક્ષયે યાતિ હ્રિયેવ પાણ્ડુતામ્ ॥ ૯॥

અસહ્યવાતોદ્ધતરેણુમણ્ડલા
પ્રચણ્ડસૂર્યાતપતાપિતા મહી ।
ન શક્યતે દ્રષ્ટુમપિ પ્રવાસિભિઃ
પ્રિયાવિયોગાનલદગ્ધમાનસૈઃ ॥ ૧૦॥

મૃગાઃ પ્રચણ્ડાતપતાપિતા ભૃશં
તૃષા મહત્યા પરિશુષ્કતાલવઃ ।
વનાન્તરે તોયમિતિ પ્રધાવિતા
નિરીક્ષ્ય ભિન્નાઞ્જનસંનિભં નભઃ ॥ ૧૧॥

સવિભ્રમૈઃ સસ્મિતજિહ્મવીક્ષિતૈર્
વિલાસવત્યો મનસિ પ્રસઙ્ગિનામ્પ્રવાસિનાં ।
અનંગસંદીપનમાશુ કુર્વતે
યથા પ્રદોષાઃ શશિચારુભૂષણાઃ ॥ ૧૨॥

રવેર્મયૂખૈરભિતાપિતો ભૃશં
વિદહ્યમાનઃ પથિ તપ્તપાંસુભિઃ ।
અવાઙ્મુખો જિહ્મગતિઃ શ્વસન્ મુહુઃ
ફણી મયૂરસ્ય તલે નિષીદતિ ॥ ૧૩॥

તૃષા મહત્યા હતવિક્રમોદ્યમઃ
શ્વસન્ મુહુર્ભૂરિવિદારિતાનનઃ ।
ન હન્ત્યદુરેઽપિ ગજાન્ મૃગાધિપો
વિલોલજિહ્વશ્ચલિતાગ્રકેસરઃ ॥ ૧૪॥

વિશુષ્કકણ્ઠાહતશીકરામ્ભસો
ગભસ્તિભિર્ભાનુમતોઽભિતાપિતાઃ ।
પ્રવૃદ્ધતૃષ્ણોપહતા જલાર્થિનો
ન દન્તિનઃ કેસરિણોઽપિ બિભ્યતિ ॥ ૧૫॥

હુતાગ્નિકલ્પૈઃ સવિતુર્મરીચિભિઃ
કલાપિનઃ ક્લાન્તશરીરચેતસઃ ।
ન ભોગિનં ઘ્નન્તિ સમીપવર્તિનં
કલાપચક્રેષુ નિવેશિતાનનમ્ ॥ ૧૬॥

સભદ્રમુસ્તં પરિપાણ્ડુકર્દમં
સરઃ ખનન્નાયતપોત્રમણ્ડલૈઃ
પ્રદીપ્તભાસો રવિણા વિતાપિતોરવેર્મયૂખૈરભિતાપિતો ભૃશં
વરાહયૂથો વિશતીવ ભૂતલમ્ ॥ ૧૭॥

વિવસ્વતા તીક્ષ્ણતરાંશુમાલિના
સપઙ્કતોયાત્ સરસોઽભિતાપિતઃ ।
ઉત્પ્લુત્ય ભેકસ્તૃષિતસ્ય ભોગિનઃ
ફણાતપત્રસ્ય તલે નિષીદતિ ॥ ૧૮॥

સમુદ્ધૃતાશેષમૃણાલજાલકં
વિપન્નમીનં દ્રુતભીતસારસં
પરસ્પરોત્પીડનસંહતૈર્ગજૈઃ
કૃતં સરઃ સાન્દ્રવિમર્દકર્દમમ્ ॥ ૧૯॥

રવિપ્રભોદ્ભિન્નશિરોમણિપ્રભો
વિલોલજિહ્વાદ્વયલીઢમારુતઃ ।
વિષાગ્નિસૂર્યાતપતાપિતઃ ફણીહુતાગ્નિસૂર્યાતપતાપિતઃ
ન હન્તિ મણ્ડૂકકુલં તૃષાકુલઃ ॥ ૨૦॥

સફેનલાલાવૃતવક્ત્રસમ્પુટં

વિનિર્ગતાલોહિતજિહ્વમુન્મુખમ્વિનિઃસૃતા ।
તૃષાકુલં નિઃસૃતમદ્રિગહ્વરાદ્
ગવેષમાણં મહિષીકુલં જલમ્ ॥ ૨૧॥

પટુતરદવદાહોત્પ્લુષ્ટશષ્પપ્રરોહાઃ
પરુષપવનવેગોત્ક્ષિપ્તસંશુષ્કપર્ણાઃ ।
દિનકરપરિતાપક્ષીણતોયાઃ સમન્તાદ્
વિદધતિ ભયમુચ્ચૈર્વીક્ષ્યમાણા વનાન્તાઃ ॥ ૨૨॥

શ્વસિતિ વિહગવર્ગઃ શીર્ણપર્ણદ્રુમસ્થઃ
કપિકુલમુપયાતિ ક્લાન્તમદ્રેર્નિકુઞ્જમ્ ।
ભ્રમતિ ગવયયૂથઃ સર્વતસ્તોયમિચ્છઞ્
શરભકુલમજિહ્મં પ્રોદ્ધરત્યમ્બુકૂપાત્ ॥ ૨૩॥

વિકચનવકુસુમ્ભસ્વચ્છસિન્દૂરભાસા
પ્રબલપવનવેગોદ્ધૂતવેગેન તૂર્ણમ્ ।
તરુવિટપલતાગ્રાલિંગનવ્યાકુલેન
દિશિ દિશિ પરિદગ્ધા ભૂમયઃ પાવકેન ॥ ૨૪॥

ધ્વનતિ પવનવિદ્ધઃ var પવનવૃદ્ધઃ પર્વતાનાં દરીષુ
સ્ફુટતિ પટુનિનાદઃ શુષ્કવંશસ્થલીષુ ।
પ્રસરતિ તૃણમધ્યે લબ્ધવૃદ્ધિઃ ક્ષણેન
ક્ષપયતિગ્લપયતિ મૃગવર્ગં પ્રાન્તલગ્નો દવાગ્નિઃ ॥ ૨૫॥

બહુતર ઇવ જાતઃ શાલ્મલીનાં વનેષુ
સ્ફુરતિ કનકગૌરઃ કોટરેષુ દ્રુમાણામ્ ।
પરિણતદલશાખાનુત્પતત્યાશૂત્પતન્ પ્રાંશુ વૃક્ષાદ્
ભ્રમતિ પવનધૂતઃ સર્વતોઽગ્નિર્વનાન્તે ॥ ૨૬॥

ગજગવયમૃગેન્દ્રા વહ્નિસંતપ્તદેહાઃ
સુહૃદ ઇવ સમેતા દ્વન્દ્વભાવં વિહાય ।
હુતવહપરિખેદાદાશુ નિર્ગત્ય કક્ષાદ્
વિપુલપુલિનદેશાં નિમ્નગાં સંવિશંતિ ॥ ૨૭॥

કમલવનચિતામ્બુઃ પાટલામોદરમ્યઃ
સુખસલિલનિષેકઃ સેવ્યચન્દ્રાંશુજાલઃસેવ્યચન્દ્રાંશુહારઃ ।
વ્રજતુ તવ નિદાઘઃ કામિનીભિઃ સમેતો

નિશિ સુલલિતગીતૈર્હર્મ્યપૃષ્ઠે સુખેન ॥ ૨૮॥

॥ ઇતિ ગ્રીષ્મઃ ॥

---

॥ ૨ । અથ વર્ષા ॥

સશીકરામ્ભોધરમત્તકુઞ્જરસ્
તડિત્પતાકોઽશનિશબ્દમર્દલઃ ।
સમાગતો રાજવદુદ્ધતદ્યુતિર્
ઘનાગમઃ કામિજનપ્રિયઃ પ્રિયે ॥ ૧॥

નિતાન્તનીલોત્પલપત્રકાન્તિભિઃ
ક્વચિત્ પ્રભિન્નાઞ્જનરાગસંનિભૈઃરાશિસંનિભૈઃ ।
ક્વચિત્ સગર્ભપ્રમદાસ્તનપ્રભૈઃ
સમાચિતં વ્યોમ ઘનૈઃ સમન્તતઃ ॥ ૨॥

તૃષાકુલૈશ્ચાતકપક્ષિણાં કુલૈઃ
પ્રયાચિતાસ્તોયભરાવલમ્બિનઃ ।
પ્રયાન્તિ મન્દં બહુવારિવર્ષિણોનવવારિવર્ષિણો
બલાહકાઃ શ્રોત્રમનોહરસ્વનાઃ ॥ ૩॥

બલાહકાશ્ચાશનિશબ્દભીષણાઃ var મર્દલાઃ
સુરેન્દ્રચાપં દધતસ્તડિદ્ગુણમ્ ।
સુતીક્ષ્ણધારાપતનોગ્રસાયકૈસ્
તુદન્તિ ચેતો નિતરાંપ્રસભં પ્રવાસિનામ્ ॥ ૪॥

પ્રભિન્નવૈદૂર્યનિભૈસ્તૃણાન્કુરૈઃ
સમાચિતા પ્રોત્થિતકન્દલીદલૈઃ ।
વિભાતિ કણ્ઠે વરરત્નભૂષિતાશુક્લેતરરત્નભૂષિતા
વરાઙ્ગનેવ ક્ષિતિરિન્દ્રગોપકૈઃ ॥ ૫॥

સદા મનોજ્ઞં સુરતોત્સવોત્સુકં var સ્વનદુત્સવોત્સુકં
વિકીર્ણવિસ્તીર્ણકલાપશોભિતમ્ ।
સવિભ્રમાલિઙ્ગનચુમ્બનાકુલમ્સસમ્ભ્રમાલિઙ્ગનચુમ્બનાકુલમ્
પ્રવૃદ્ધનૃત્યંપ્રવૃત્તનૃત્યં કુલમદ્ય બર્હિણામ્ ॥ ૬॥

નિપાતયન્ત્યઃ પરિતસ્તટદ્રુમાન્

પ્રવૃદ્ધવેગૈઃ સલિલૈરનિર્મલૈઃ ।
સ્ત્રિયઃ પ્રદુષ્ટા ઇવ જાતવિભ્રમાઃ
પ્રયાન્તિ નદ્યસ્ત્વરિતં પયોનિધિમ્ ॥ ૭॥

તૃણોદ્ગમૈરુદ્ધતકોમલાઙ્કુરૈશ્ var તૃણોત્કરૈરુદ્ગતકોમલાઙ્કુરૈશ્
ચિતાનિ નીલૈર્હરિણીમુખક્ષતૈઃ ।
વનાનિ રમ્યાણિવૈન્ધ્યાનિ હરંતિ માનસં
વિભૂષિતાન્યુદ્ગતપલ્લવૈર્દ્રુમૈઃ ॥ ૮॥

વિલોલનેત્રોત્પલશોભિતાનનૈર્
મૃગૈઃ સમન્તાદુપજાતસાધ્વસૈઃ ।
સમાચિતા સૈકતિની વનસ્થલી
સમુત્સુકત્વં પ્રકરોતિ ચેતસઃ ॥ ૯॥

સુતીક્ષ્ણમુચ્ચૈરસતાં var અભીક્ષ્ણમુચ્ચૈર્ધ્વનતાં પયોમુચાં
ઘનાન્ધકારીકૃતશર્વરીષ્વપિ ।
તડિત્પ્રભાદર્શિતમાર્ગભૂમયઃ
પ્રયાન્તિ રાગાદભિસારિકાઃ સ્ત્રિયઃ ॥ ૧૦॥

પયોધરૈર્ભીમગભીરનિઃસ્વનૈર્ var નૈસ્
ધ્વનદ્ભિરુદ્વેજિતચેતસોતડિદ્ભિરુદ્વેજિતચેતસો ભૃશમ્ ।
કૃતાપરાધાનપિ યોષિતઃ પ્રિયાન્
પરિષ્વજન્તે શયને નિરન્તરમ્ ॥ ૧૧॥

વિલોચનેન્દીવરવારિબિન્દુભિર્
નિષિક્તબિમ્બાધરચારુપલ્લવાઃ ।
નિરસ્તમાલ્યાભરણાનુલેપનાઃ
સ્થિતા નિરાશાઃ પ્રમદાઃ પ્રવાસિનામ્ ॥ ૧૨॥

વિપાણ્ડવં var વિપાણ્ડુરં કીટરજસ્તૃણાન્વિતં
ભુજઙ્ગવદ્ વક્રગતિપ્રસર્પિતમ્ ।
સસાધ્વસૈર્ભેકકુલૈર્વિલોકિતંનિરીક્ષિતં
પ્રયાતિ નિમ્નાભિમુખં નવોદકમ્ ॥ ૧૩॥

પ્રફુલ્લપત્રાં var વિપન્નપુષ્પાં નલિનીં સમુત્સુકાં
વિહાય ભૃઙ્ગાઃ શ્રુતિહારિનિઃસ્વનાઃ ।
પતન્તિ મૂઢાઃ શિખિનાં પ્રનૃત્યતાં

કલાપચક્રેષુ નવોત્પલાશયા ॥ ૧૪॥

વનદ્વિપાનાં નવતોયદસ્વનૈર્
મદાન્વિતાનાં ધ્વનતાં મુહુર્મુહુઃ ।
કપોલદેશા વિમલોત્પલપ્રભાઃ
સભૃઙ્ગયૂથૈર્મદવારિભિશ્ચિતઃ ॥ ૧૫॥

આતોયનમ્રામ્બુદચુમ્બિતોપલાઃ var સતોયનમ્રામ્બુદચુમ્બિતોપલાઃ
સમાચિતાઃ પ્રસ્રવણૈઃ સમન્તતઃ ।
પ્રવૃત્તનૃત્યૈઃ શિખિભિઃ સમાકુલાઃ
સમુત્સુકત્વં જનયન્તિ ભૂધરાઃ ॥ ૧૬॥

કદમ્બસર્જાર્જુનકેતકીવનમ્
વિકમ્પયંસ્તત્કુસુમાધિવાસિતઃ ।
સશીકરામ્ભોધરસઙ્ગશીતલઃ
સમીરણઃ કં ન કરોતિ સોત્સુકમ્ ॥ ૧૭॥

શિરોરુહૈઃ શ્રોણિતટાવલમ્બિભિઃ
કૃતાવતંસૈઃ કુસુમૈઃ સુગન્ધિભિઃ ।
સ્તનૈઃ સહારૈર્વદનૈઃ સસીધુભિઃ
સ્ત્રિયો રતિં સંજનયન્તિ કામિનામ્ ॥ ૧૮॥

વહન્તિ વર્ષન્તિ નદન્તિ ભાન્તિ
ધ્યાયન્તિ નૃત્યન્તિ સમાશ્રયન્તિ ।
નદ્યો ઘના મત્તગજા વનાન્તાઃ
પ્રિયાવિહીનાઃ શિખિનઃ પ્લવઙ્ગમાઃ ॥ ૧૯॥ પ્રક્ષિપ્તઃ
તડિલ્લતાઃ શક્રધનુર્વિભૂષિતાઃ
પયોધરાસ્તોયભરાવલમ્બિનઃ ।
સ્ત્રિયઃ સ્વકાઞ્ચીમણિકુણ્ડલોજ્જ્વલાસ્ત્રિયશ્ચકાઞ્ચીમણિકુણ્ડલોજ્જ્વલા
હરન્તિ ચેતો યુગપત્ પ્રવાસિનામ્ ॥ ૨૦॥

માલાઃ કદમ્બનવકેસરકેતકીભિર્
આયોજિતઃ શિરસિ બિભ્રતિ યોષિતોઽદ્ય ।
કર્ણાન્તરેષુ કકુભદ્રુમમઞ્જરીભિઃ
શ્રોત્રાનુકૂલરચિતાનવતંસકાંશ્ચેચ્છાનુકૂલરચિતાનવતંસકાંશ્ચ ॥ ૨૧॥

કાલાગરુપ્રચુરચન્દનચર્ચિતાઙ્ગ્યઃ

પુષ્પાવતંસસુરભીકૃતકેશપાશાઃ ।
શ્રુત્વા ધ્વનિં જલમુચાં ત્વરિતં પ્રદોષે
શય્યાગૃહં ગુરુગૃહાત્ પ્રવિશન્તિ નાર્યઃ ॥ ૨૨॥

કુવલયદલનીલૈરુન્નતૈસ્તોયનમ્રૈર્
મૃદુપવનવિધૂતૈર્મન્દમન્દં ચલદ્ભિઃ ।
અપહૃતમિવ ચેતસ્તોયદૈઃ સેન્દ્રચાપૈઃ
પથિકજનવધૂનાં તદ્વિયોગક્ષતાનામ્તદ્વિયોગાકુલાનામ્ ॥ ૨૩॥

મુદિત ઇવ કદમ્બૈર્જાતપુષ્પૈઃ સમન્તાત્
પવનચલિતશાખૈઃ શાખિભિર્નૃત્યતીવ ।
હસિતમિવ વિધત્તે સૂચિભિઃ કેતકીનાં
નવસલિલનિષેકઃ શાન્તતાપોછિન્નતાપો વનાન્તઃ ॥ ૨૪॥

શિરસિ બકુલમાલાં માલતીભિઃ સમેતાં
કુસુમિતનવપુષ્પૈર્યૂથિકાકુડ્મલૈશ્ચ ।
વિકચનવકદમ્બૈઃ કર્ણપૂરં વધૂનાં
રચયતિ જલદૌઘઃ કાન્તવત્ કાલ એષઃ ॥ ૨૫॥

દધતિ કુચયુગાગ્રૈરુન્નતૈર્હારયષ્ટિં var પૃથુકુચાગ્રૈરુન્નતૈર્હારયષ્ટિં
પ્રતનુસિતદુકૂલાન્યાયતૈઃ શ્રોણિબિમ્બૈઃ ।
નવજલકણસેકાદુન્નતાંનવજલકણસેકાદુદ્ગતાં રોમરાજિં
ત્રિવલિવલિતશોભાંલલિતવલિવિભઙ્ગૈર્ મધ્યદેશૈશ્ચ નાર્યઃ ॥ ૨૬॥

નવજલકણસઙ્ગાચ્છીતતામાદધાનઃ
કુસુમભરનતાનાં લાસકઃ પાદપાનામ્ ।
જનિતસુરભિગન્ધઃજનિતરુચિરગન્ધઃ કેતકીનાં રજોભિર્
અપહરતિ નભસ્વાન્ પ્રોષિતાનાં મનાંસિ ॥ ૨૭॥

જલભરનમિતાનામશ્રયોઽસ્માકમુચ્ચૈર્
અયમિતિ જલસેકૈસ્તોયદાસ્તોયનમ્રાઃ ।
અતિશયપરુષાભિર્ગ્રીષ્મવહ્નેઃ શિખાભિઃ
સમુપજનિતતાપં હ્લાદયન્તીવ વિન્ધ્યમ્ ॥ ૨૮॥

બહુગુણરમણીયો યોષિતાં ચિત્તહારી var બહુગુણરમણીયઃ કામિનીચિત્તહારી
તરુવિટપલતાનાં બાન્ધવો નિર્વિકારઃ ।
જલદસમય એષ પ્રાણિનાં પ્રાણભૂતો

દિશતુ તવ હિતાનિ પ્રાયશો વાઞ્છિતાનિ ॥ ૨૯॥

॥ ઇતિ વર્ષા ॥

---

॥ ૩ । અથ શરત્ ॥

કાશાંશુકા વિકચપદ્મમનોજ્ઞવક્ત્રા
સોન્માદહંસરુતનૂપુરનાદરમ્યારવનૂપુરનાદરમ્યા ।
આપક્વશાલિલલિતાનતગાત્રયષ્ટિઃરુચિરાનતગાત્રયષ્ટિઃ
પ્રાપ્તા શરન્નવવધૂરિવ રમ્યરૂપા ॥ ૧॥

કાશૈર્મહી શિશિરદીધિતિના રજન્યો
હંસૈર્જલાનિ સરિતાં કુમુદૈઃ સરાંસિ ।
સપ્તચ્છદૈઃ કુસુમભારનતૈર્વનાન્તાઃ
શુક્લીકૃતાન્યુપવનાનિ ચ માલતીભિઃ ॥ ૨॥

ચઞ્ચન્મનોજ્ઞશફરીરસનાકલાપાઃ
પર્યન્તસંસ્થિતસિતાણ્ડજપંક્તિહારાઃ ।
નદ્યો વિશાલપુલિનોરુનિતમ્બબિમ્બાવિશાલપુલિનાન્તનિતમ્બબિમ્બા
મન્દં પ્રયાન્તિ સમદાઃ પ્રમદા ઇવાદ્ય ॥ ૩॥

વ્યોમ ક્વચિદ્ રજતશઙ્ખમૃણાલગૌરૈસ્
ત્યક્તામ્બુભિર્લઘુતયા શતશઃ પ્રયાતૈઃ ।
ઉત્પ્રેક્ષ્યતેસંલક્ષ્યતે પવનવેગચલૈઃ પયોદૈ
રાજેવ ચામરશતૈરભિવીજ્યમાનઃચામરશતૈરુપવીજ્યમાનઃ ॥ ૪॥

ભિન્નાઞ્જનપ્રચયકાન્તિ નભો મનોજ્ઞં
બન્ધૂકપુષ્પરજસાઽરુણિતા ચ ભૂમિઃ ।
વપ્રાશ્ચ પક્વકલમાવૃતભૂમિભાગાચારુકલમાવૃતભૂમિભાગાઃ
ઉત્કણ્ઠયન્તિપ્રોત્કણ્ઠયન્તિ ન મનો ભુવિ કસ્ય યૂનઃ ॥ ૫॥

મન્દાનિલાકુલિતચારુતરાગ્રશાખઃ
પુષ્પોદ્ગમપ્રચયકોમલપલ્લવાગ્રઃ ।
મત્તદ્વિરેફપરિપીતમધુપ્રસેકશ્
ચિત્તં વિદારયતિ કસ્ય ન કોવિદારઃ ॥ ૬॥

તારાગણપ્રચુરભૂષણમુદ્વહન્તી var તારાગણપ્રવરભૂષણમુદ્વહન્તી

મેઘોપરોધપરિમુક્તશશાङ્કવક્ત્રામેઘાવરોધપરિમુક્તશશાङ્કવક્ત્રા ।
જ્યોત્સ્નાદુકૂલમમલં રજની દધાના
વૃદ્ધિં પ્રયાત્યનુદિનં પ્રમદેવ બાલા ॥ ૭॥

કારણ્ડવાહનવિઘટ્ટિતવીચિમાલાઃ
કાદમ્બસારસકુલાકુલતીરદેશાઃ ।
કુર્વન્તિ હંસવિરુતૈઃ પરિતો જનસ્ય
પ્રીતિં સરોરુહરજોરુણિતાસ્તટિન્યઃ ॥ ૮॥

નેત્રોત્સવો હૃદયહારિમરીચિમાલઃ
પ્રહ્લાદકઃ શિશિરશીકરવારિવર્ષી ।
પત્યુર્વિયોગવિષદિગ્ધશરક્ષતાનાં
ચન્દ્રો દહત્યનુદિનંદહત્યતિતરાં તનુમઙ્ગનાનામ્ ॥ ૯॥

આકમ્પયન્ ફલભરાનતશાલિજાલાન્
યાનર્તયંસ્તરુવરાન્ કુસુમાવનમ્રાન્ ।
ઉત્ફુલ્લપङ્કજવનાં નલિનીં વિધુન્વન્
યૂનાં મનશ્ચલયતિ પ્રસભં નભસ્વાન્ ॥ ૧૦॥

સોન્માદહંસમિથુનૈરુપશોભિતાનિ
સ્વચ્છપ્રફુલ્લકમલોત્પલભૂષિતાનિ ।
મન્દપ્રભાતપવનોદ્ગતવીચિમાલાન્
ન્યુત્કણ્ઠયન્તિ હૃદયં સહસા સરાંસિ ॥ ૧૧॥

નષ્ટે ધનુર્બલભિદો જલદોદરેષુ
સૌદામિની સ્ફુરતિ નાદ્ય વિયત્પતાકા ।
ધુન્વન્તિ પક્ષપવનૈર્ન નભો બલાકાઃ
પશ્યન્તિ નોન્નતમુખા ગગનં મયૂરાઃ ॥ ૧૨॥

નૃત્યપ્રયોગરહિતાઞ્શિખિનો વિહાય
હંસાનુપૈતિ મદનો મધુરપ્રગીતાન્ ।
મુક્ત્વા કદમ્બકુટજાર્જુનસર્જનીપાન્
સપ્તચ્છદાનુપગતા કુસુમોદ્ગમશ્રીઃ ॥ ૧૩॥

શેફાલિકાકુસુમગન્ધમનોહરાણિ
શાખાસ્થિતાણ્ડજકુલપ્રતિનાદિતાનિસ્વસ્થસ્થિતાણ્ડજકુલપ્રતિનાદિતાનિ ।
પર્યન્તસંસ્થિતમૃગીનયનોત્પલાનિ

પ્રોત્કણ્ઠયન્ત્યુપવનાનિ મનાંસિ પુંસામ્યૂનામ્ ॥ ૧૪॥

કહ્લારપદ્મકુમુદાનિ મુહુર્વિધુન્વંસ્
તત્સઙ્ગમાદધિકશીતલતામુપેતઃ ।
સોત્કાં કરોતિ વનિતાંઉત્કણ્ઠયત્યતિતરાં પવનઃ પ્રભાતે
પત્રાન્તલગ્નતુલિનામ્બુ વિધૂયમાનઃપત્રાન્તલગ્નતુહિનાનિ હરંસ્તરૂણાં ॥ ૧૫॥

સમ્પન્નશાલિનિચયાવૃતભૂતલાનિ
સુષ્ઠુસ્થિતપ્રચુરગોકુલશોભિતાનિસ્વસ્થસ્થિતપ્રચુરગોકુલશોભિતાનિ ।
હંસૈશ્ચ સારસકુલૈઃ પ્રતિનાદિતાનિ
સીમાન્તરાણિ જનયન્તિ જનપ્રમોદમ્ ॥ ૧૬॥

હંસૈર્જિતા સુલલિતા ગતિરઙ્ગનાનાં
અમ્ભોરુહૈર્વિકસિતૈર્મુખચન્દ્રકાન્તિઃ ।
નીલોત્પલૈર્મદચલાનિનીલોત્પલૈર્મદકલાનિ વિલોચનાનિ
ભ્રૂવિભ્રમશ્ચ સરિતાં તનુભિસ્તરઙ્ગૈઃરુચિરાસ્તનુભિસ્તરઙ્ગૈઃ ॥ ૧૭॥

શ્યામા લતાઃ કુસુમભારનતપ્રવાલાઃ
સ્ત્રીણાં હરન્તિ ધૃતભૂષણબાહુકાન્તિમ્ ।
દન્તાવભાસવિશદસ્મિતચન્દ્રકાન્તિં
કઙ્કેલિપુષ્પરુચિરા નવમાલતી ચ ॥ ૧૮॥

કેશાન્નિતાન્તઘનનીલવિકુઙ્ચિતાગ્રાન્
આપૂરયન્તિ વનિતા નવમાલતીભિઃ ।
કર્ણેષુ ચ પ્રચલકાંચનકુણ્ડલેષુપ્રવરકાંચનકુણ્ડલેષુ
નીલોત્પલાનિ વિવિધાનિવિકચાનિ નિવેશયન્તિ ॥ ૧૯॥

હારૈઃ સચન્દનરસૈઃ સ્તનમણ્ડલાનિ
શ્રોણીતટં સુવિપુલં રશનાકલાપૈઃ ।
પાદામ્બુજાનિ કલનૂપુરશેખરૈશ્ચ
નાર્યઃ પ્રહૃષ્ટમનસોઽદ્ય વિભૂષયન્તિ ॥ ૨૦॥

સ્ફુટકુમુદચિતાનાં રાજહંસાસ્થિતાનાં var રાજહંસાશ્રિતાનાં
મરકતમણિભાસા વારિણા ભૂષિતાનામાપૂરિતાનામ્ ।
શ્રિયમતિશયરૂપાં વ્યોમ તોયાશયાનાં
વહતિ વિગતમેઘં ચન્દ્રતારાવકીર્ણમ્ ॥ ૨૧॥

સરસિ કુમુદસઙ્ગાદ્ var કુસુમસઙ્ગાદ્ વાયવો વાન્તિ શીતા
વિગતજલદવૃન્દા દિગ્વિભાગા મનોજ્ઞાઃ
વિગતકલુષમમ્ભઃ શ્યાનપઙ્કા ધરિત્રી
વિમલકિરણચન્દ્રં વ્યોમ તારાવિચિત્રમ્ ॥ ૨૨॥

કરકમલમનોજ્ઞાઃ કાન્તસંસક્તહસ્તા
વદનવિજિતચન્દ્રાઃ કાશ્ચિદ્ અન્યાસ્તરુણ્યઃ ।
ચિતકુસુમસુગન્ધિ પ્રાવિશન્તીવ વેશ્મ
પ્રબલમદનહેતોસ્ત્યક્તસંગીતરાગાઃ ॥ ૨૩॥પ્રક્ષિપ્તઃ
સુરતરસવિલાસાત્ સત્સખીભિઃ સમેત્ય
અસમરસવિનોદં સૂચયન્તિ પ્રકામમ્ ।
અનુપમમુખરાગા રાત્રિમધ્યે વિનોદાન્
શરદિ તરુણકાન્તાઃ સૂચયન્તિ પ્રમોદાત્ ॥ ૨૪॥પ્રક્ષિપ્તઃ
દિવસકરમયૂખૈર્બોધ્યમાનં પ્રભાતે
વરયુવતિમુખાભં પઙ્કજં જૃમ્ભતેઽદ્ય ।
કુમુદમપિ ગતેઽસ્તં લીયતે ચન્દ્રબિમ્બે
હસિતમિવ વધૂનાં પ્રોષિતેષુ પ્રિયેષુ ॥ ૨૫॥

અસિતનયનલક્ષ્મીં લક્ષયિત્વોત્પલેષુ
ક્વણિતકનકકાઞ્ચીં મત્તહંસસ્વનેષુ ।
અધરરુચિરશોભાં બન્ધુજીવે પ્રિયાયાઃ
પથિકજન ઇદાનીં રોદિતિ ભ્રાન્તચિત્તઃભ્રાન્તચેતાઃ ॥ ૨૬॥

સ્ત્રીણાં નિધાય વદનેષુ શશાઙ્કલક્ષ્મીં
હાસ્યે વિશુદ્ધવદને કુમુદાકરશ્રીમ્ ।કામ્યં ચ હંસવચનં મણિનૂપુરેષુ
બન્ધૂકકાન્તિમધરેષુ મનોહરેષુ
ક્વાપિ પ્રયાતિ સુભગા શરદાગમશ્રીઃ ॥ ૨૭॥

વિકચકમલવક્ત્રા ફુલ્લનીલોત્પલાક્ષી
કુસુમિતનવકાશા શ્વેતવાસોવિકસિતનવકાશશ્વેતવાસો વસાના ।
કુમુદરુચિરહાસાકુમુદરુચિરકાંતિઃ કામિનીવોન્મદેયં
ઉપદિશતુપ્રતિદિશતુ શરદ્ વશ્ચેતસઃ પ્રીતિમગ્ર્યામ્ ॥ ૨૮॥

॥ ઇતિ શરત્ ॥

॥ ૪ । અથ હેમન્તઃ ॥

નવપ્રવાલોદ્ગમસસ્યરમ્યઃ
પ્રફુલ્લલોધ્રઃ પરિપક્વશાલિઃ ।
વિલીનપદ્મઃ પ્રપતત્તુષારો
હેમન્તકાલઃ સમુપાગતોઽયમ્સમુપાગતઃ પ્રિયે ॥ ૧॥

મનોહરૈઃ કુઙ્કુમરાગપિઙ્ગૈસ્ var ચન્દનરાગગૌરૈસ્
તુષારકુન્દેન્દુનિભૈશ્ચ હારૈઃ ।
વિલાસિનીનાં સ્તનશાલિનીનાં
નાલંક્રિયન્તે સ્તનમણ્ડલાનિ ॥ ૨॥

ન બાહુયુગ્મેષુ વિલાસિનીનાં
પ્રયાન્તિ સઙ્ગં વલયાઙ્ગદાનિ ।
નિતમ્બબિમ્બેષુ નવં દુકૂલં
તન્વંશુકં પીનપયોધરેષુ ॥ ૩॥

કાઞ્ચીગુણૈઃ કાઞ્ચનરત્નચિત્રૈર્
નો ભૂષયન્તિ પ્રમદા નિતમ્બાન્ ।
ન નૂપુરૈર્હંસરુતં ભજદ્ભિઃ
પાદામ્બુજાન્યમ્બુજકાન્તિભાઞ્જિ ॥ ૪॥

ગાત્રાણિ કાલીયકચર્ચિતાનિ
સપત્રલેખાનિ મુખામ્બુજાનિ ।
શિરાંસિ કાલાગરુભૂષિતાનિકાલાગરુધૂપિતાનિ
કુર્વન્તિ નાર્યઃ સુરતોત્સવાય ॥ ૫॥

રતિશ્રમક્ષામવિપાણ્ડુવક્ત્રાઃ
પ્રાપ્તાશ્ચ હર્ષાભ્યુદયં તરુણ્યઃપ્રાપ્તેઽપિ હર્ષાભ્યુદયે તરુણ્યઃ ।
હસન્તિ નોચ્ચૈર્દશનાગ્રભિન્નાન્
પ્રપીડ્યમાનાનધરાનવેક્ષ્ય ॥ ૬॥

પીનસ્તનોરુસ્થલભાગશોભાં
આસાદ્ય તત્પીડનજાતખેદઃ ।
તૃણાગ્રલગ્નૈસ્તુહિનૈઃ પતદ્ભિર્
આક્રન્દતીવોષસિ શીતકાલઃ ॥ ૭॥

પ્રભૂતશાલિપ્રસવૈશ્ચિતાનિ
મૃગાઙ્ગનાયૂથવિભૂષિતાનિ ।
મનોહરક્રૌઞ્ચનિનાદિતાનિ
સીમાન્તરાણ્યુત્સુકયન્તિ ચેતઃ ॥ ૮॥

પ્રફુલ્લનીલોત્પલશોભિતાનિ
શરારિકાદમ્બવિઘટ્ટિતાનિસોન્માદકાદમ્બવિભૂષિતાનિ ।
પ્રસન્નતોયાનિ સશૈવલાનિસુશીતલાનિ
સરાંસિ ચેતાંસિ હરન્તિ પુંસામ્ ॥ ૯॥

પાકં વ્રજન્તી હિમપાતશીતૈર્
આધૂયમાના સતતં મરુદ્ભિઃ ।
પ્રિયે પ્રિયઙ્ગુઃ પ્રિયવિપ્રયુક્તા
વિપાણ્ડુતાં યાતિ વિલાસિનીવ ॥ ૧૦॥

પુષ્પાસવામોદસુગન્ધિવક્ત્રો
નિઃશ્વાસવાતૈઃ સુરભીકૃતાઙ્ગઃ ।
પરસ્પરાઙ્ગવ્યતિષાઙ્ગશાયી
શેતે જનઃ કામશરાનુવિદ્ધઃ ॥ ૧૧॥

દન્તચ્છદૈર્દન્તવિઘાતચિહ્નૈઃ var દન્તચ્છદૈઃ સવ્રણદન્તચિહ્નૈઃ
સ્તનૈશ્ચ પાણ્યગ્રકૃતાભિલેખૈઃ ।
સંસૂચ્યતે નિર્દયમઙ્ગનાનાં
રતોપભોગો નવયૌવનાનામ્ ॥ ૧૨॥

કાચિદ્ વિભૂષયતિ દર્પણયુક્તહસ્તા var દર્પણસક્તહસ્તા
બાલાતપેષુ વનિતા વદનારવિન્દમ્ ।
દન્તચ્છદં પ્રિયતમેન નિપીતસારં
દન્તાગ્રભિન્નમપકૃષ્યદન્તાગ્રભિન્નમવકૃષ્ય નિરીક્ષતે ચ ॥ ૧૩॥

અન્યા પ્રકામસુરતશ્રમખિન્નદેહા
રાત્રિપ્રજાગરવિપાટલનેત્રયુગ્મારાત્રિપ્રજાગરવિપાટલનેત્રપદ્મા ।
શય્યાન્તરેષુસ્રસ્તાંસદેશ લુલિતાકુલકેશપાશા
નિદ્રાં પ્રયાતિ મૃદુસૂર્યકરાભિતપ્તા ॥ ૧૪॥

નિર્માલ્યદામ પરિભુક્તમનોજ્ઞગન્ધમ્
મૂર્ધ્નોઽપનીય ઘનનીલશિરોરુહાન્તાઃ ।

પીનોન્નતસ્તનભરાનતગાત્રયષ્ટ્યઃ
કુર્વન્તિ કેશરચનામપરાસ્તરુણ્યઃ ॥ ૧૫॥

અન્યા પ્રિયેણ પરિભુક્તમવેક્ષ્ય ગાત્રમ્
હર્ષાન્વિતા વિરચિતાધરરાગશોભાવિરચિતાધરચારુશોભા ।
કુર્પાસકં પરિદધાતિ નવં નતાઙ્ગીનખક્ષતાઙ્ગી
વ્યાલમ્બિનીલલુલિતાલકકુઞ્ચિતાક્ષી ॥ ૧૬॥

અન્યાશ્ચિરં સુરતકેલિપરિશ્રમેણ
ખેદં ગતાઃ પ્રશિથિલીકૃતગાત્રયષ્ટ્યઃ ।
સમ્પીડ્યમાનવિપુલોરુપયોધરાર્ત્તાસંહૃષ્યમાણપુલકોરુપયોધરાન્તા
અભ્યઞ્જનં વિદધતિ પ્રમદાઃ સુશોભમ્સુશોભાઃ ॥ ૧૭॥

બહુગુણરમણીયો યોષિતાં ચિત્તહારી
પરિણતબહુશાલિવ્યાકુલગ્રામસીમઃ ।
વિનિપતિતતુષારઃ ક્રૌઞ્ચનાદોપગીતઃ
પ્રદિશતુ હિમયુક્તઃ કાલ એષઃ પ્રિયાન્ વઃહિમયુક્તસ્ત્વેષ કાલઃ સુખં વઃ ॥ ૧૮॥

॥ ઇતિ હેમન્તઃ ॥

---

## ॥ ૫ । અથ શિશિરઃ ॥

પ્રરૂઢશાલિપ્રચયાવૃતક્ષિતિં var પ્રરૂઢશાલીક્ષુચયાવૃતક્ષિતિં
નિદ્રોત્થિતક્રૌઞ્ચનિનાદશોભિતમ્ક્વચિત્સ્થિતક્રૌઞ્ચનિનાદશોભિતમ્ ।
પ્રકામકામં પ્રમદાજનપ્રિયં
વરોરુ કાલં શિશિરાહ્વયં શ઼ૃણુ ॥ ૧॥

નિરુદ્ધવાતાયનમન્દિરોદરં
હુતાશનો ભાનુમતો ગભસ્તયઃ ।
ગુરૂણિ વાસાંસ્યબલાઃ સયૌવનાઃ।
પ્રયાન્તિ કાલેઽધકાલેઽત્ર જનસ્ય સેવ્યતામ્ ॥ ૨॥

ન ચન્દનં ચન્દ્રમરીચિશીતલં
ન હર્મ્યપૃષ્ઠં શરદિન્દુનિર્મલમ્ ।
ન વાયવઃ સાન્દ્રતુષારશીતલા
જનસ્ય ચિત્તં રમયન્તિ સાંપ્રતમ્ ॥ ૩॥

તુષારસંઘાતનિપાતશીતલાઃ
શશાઙ્કભાભિઃ શિશિરીકૃતાઃ પુનઃ ।
વિપાણ્ડુતારાગણચારુભૂષણા
જનસ્ય સેવ્યા ન ભવન્તિ રાત્રયઃ ॥ ૪॥

ગૃહીતતામ્બૂલવિલેપનસ્રજઃ
પુષ્પાસવામોદિતવક્ત્રપઙ્કજાઃ ।
પ્રકામકાલાગરુધૂપવાસિતં
વિશન્તિ શય્યાગૃહમુત્સુકાઃ સ્ત્રિયઃ ॥ ૫॥

કૃતાપરાધાન્ બહુશોઽભિતર્જિતાન્
સવેપથૂન્ સાધ્વસમન્દચેતસઃસાધ્વસલુપ્તચેતસઃ ।
નિરીક્ષ્ય ભર્તૄન્ સુરતાભિલાષિણઃ
સ્ત્રિયોઽપરાધાન્ સમદા વિસસ્મરુઃ ॥ ૬॥

પ્રકામકામૈઃ સુરતૈશ્ચ નિર્દયં var યુવભિઃ સુનિર્દયં
નિશાસુ દીર્ઘાસ્વતિપીડિતાશ્ચિરમ્દીર્ઘાસ્વભિરામિતાશ્ચિરમ્ ।
ભ્રમન્તિ મન્દં શ્રમખેદિતોરવઃ
ક્ષપાવસાને નવયૌવનાઃ સ્ત્રિયઃ ॥ ૭॥

મનોજ્ઞકૂર્પાસકપીડિતસ્તનાઃ
સરાગકૌશેયવિભૂષિતોરવઃસરાગકૌશેયકભૂષિતોરવઃ ।
નિવેશિતાન્તઃકુસુમૈઃ શિરોરુહૈર્
વિભૂષયન્તીવ હિમાગમં સ્ત્રિયઃ ॥ ૮॥

પયોધરૈઃ કુઙ્કુમરાગપિઞ્જરૈઃ
સુખોપસેવ્યૈર્નવયૌવનોન્નતૈઃસુખોપસેવ્યૈર્નવયૌવનોષ્મભિઃ ।
વિલાસિનીનાંવિલાસિનીભિઃ પરિપીડિતોરસઃ
ક્ષપન્તિસ્વપન્તિ શીતં પરિભૂય કામિનઃ ॥ ૯॥

સુગન્ધિનિઃશ્વાસવિકમ્પિતોત્પલં
મનોહરં કામરતિપ્રબોધનમ્ ।
નિશાસુ હૃષ્ટાઃ સહ કામિભિઃ સ્ત્રિયઃ
પિબન્તિ મદ્યં મદનીયમુત્તમમ્ ॥ ૧૦॥

અપગતમદરાગા યોષિદેકા પ્રભાતે
કૃતનિબિડકુચાગ્રા પત્યુરાલિઙ્ગનેન ।

પ્રિયતમપરિભુક્તં વીક્ષમાણા સ્વદેહં
વ્રજતિ શયનગેહાદ્ વસ્ત્રમાકર્ષયન્તીશયનવાસાદ્વાસમન્યં હસન્તી ॥ ૧૧॥

અગુરુસુરભિધૂપામોદિતં કેશપાશં
ગલિતકુસુમમાલં ધુન્વતી કુઞ્ચિતાગ્રમ્કુઞ્ચિતાગ્રમ્ વહન્તી ।
ત્યજતિ ગુરુનિતમ્બા નિમ્નનાભિઃ સુમધ્યા
ઽપ્યુષસિ શયનવાસઃ કામિની કામશોભાહુષસિ શયનમન્યા કામિની ચારુશોભા ॥ ૧૨॥

કનકકમલકાન્તૈશ્ચારુતામ્રાધરોષ્ઠૈઃ
શ્રવણતટનિયુક્તૈઃશ્રવણતટનિષક્તૈઃ પાટલોપાન્તનેત્રૈઃ ।
ઉષસિ વદનબિમ્બૈરંસસંસક્તકેશૈઃ
શ્રિય ઇવ ગૃહમધ્યે સંસ્થિતા યોષિતોઽદ્ય ॥ ૧૩॥

પૃથુજઘનભરાર્તાઃ કિંચિદાનમ્રમધ્યાઃ
સ્તનભરપરિખેદાન્ મન્દમન્દં વ્રજન્ત્યઃ ।
સુરતસમયવેષં નૈશમન્ત્યં વિહાયનૈષમાશુ પ્રહાય
દધતિ દિવસયોગ્યં વેષમેતાસ્તરુણ્યઃવેષમન્યાસ્તરુણ્યઃ ॥ ૧૪॥

નખપદરચિતાગ્રાન્ var નખપદચિતભાગાન્ વીક્ષ્યમાણાઃ સ્તનાન્તાન્
અધરકિસલયાગ્રાન્ દન્તભિન્નાનધરકિસલયાગ્રં દન્તભિન્નં સ્પૃશન્ત્યઃ ।
અભિમતતરમોદં વર્ણયન્ત્યસ્તરુણ્યઃઅભિમતરતવેષં નન્દયન્ત્યસ્તરુણ્યઃ
સવિતુરુદયકાલે ભૂષયન્ત્યાનનાનિ ॥ ૧૫॥

પ્રચુરગુડવિકારઃ સ્વાદુશાલીક્ષુરમ્યઃ
પ્રબલસુરતકેલિર્જાતકન્દર્પદર્પઃ ।
પ્રિયતમરહિતાનાંપ્રિયજનરહિતાનાં ચિત્તસંતાપહેતુઃ
શિશિરસમય એષઃ શ્રેયસે વોઽસ્તુ નિત્યમ્ ॥ ૧૬॥

॥ ઇતિ શિશિરઃ ॥

---

॥ ૬ । અથ વસન્તઃ ॥

પ્રફુલ્લચૂતાઙ્કુરતીક્ષ્ણસાયકો
દ્વિરેફમાલાં વિદધદ્ ધનુર્ગુણમ્દ્વિરેફમાલાવિલસદ્ધનુર્ગુણઃ ।
મનાંસિ ભેત્તું સુરતપ્રસઙ્ગિનાં
વસન્તયોદ્ધા સમુપાગતઃ પ્રિયે ॥ ૧॥

દ્રુમાઃ સપુષ્પાઃ સલિલં સપદ્મં
સ્ત્રિયઃ સકામાઃ પવનઃ સુગન્ધિઃ ।
સુખાઃ પ્રદોષા દિવસાશ્ચ રમ્યાઃ
સર્વં પ્રિયે ચારુતરં વસન્તે ॥ ૨॥

વાપીજલાનાં મણિમેખલાનાં
શશાङ्કભાસાં પ્રમદાજનાનામ્ ।
ચૂતદ્રુમાણાં કુસુમાનતાનાં
તનોતિદદાતિ સૌભાગ્યમયં વસન્તઃ ॥ ૩॥

સ્તનેષુ હારાઃ સિતચન્દનાર્દ્રાઃ
મુખેષુ તામ્બૂલસુગન્ધિવાતાઃભુજેષુ સઙ્ગં વલયાઙ્ગદાનિ ।
પ્રયાન્તિ નિઃશઙ્કમનઙ્ગસૌખ્યંપ્રયાન્ત્યનઙ્ગાતુરમાનસાનાં
વિલાસિનીનાં જઘનેષુ કાઞ્ચ્યઃ ॥ ૪॥

કુસુમ્ભરાગારુણિતૈર્દુકૂલૈર્
નિતમ્બબિમ્બાનિ વિલાસિનીનામ્ ।
તન્વંશુકૈઃ કુङ્કુમરાગગૌરૈર્
અલઙ્ક્રિયન્તે સ્તનમણ્ડલાનિ ॥ ૫॥

કર્ણેષુ યોગ્યં નવકર્ણિકારં
ચલેષુ નીલેષ્વલકેષ્વશોકમ્ ।
શિખાસુ ફુલ્લા નવમલ્લિકાશ્ચ
પ્રયાન્તિ સઙ્ગં પ્રમદાજનસ્ય ॥ ૬॥

સપત્રલેખેષુ વિલાસિનીનાં
વક્ત્રેષુ હેમામ્બુરુહોપમેષુ
રત્યન્તરે મૌક્તિકતુલ્યરૂપઃરત્નાન્તરે મૌક્તિકસઙ્ગરમ્યઃ
સ્વેદોદ્ગમો વિસ્તરતામુપૈતિ ॥ ૭॥

ઉલ્લાસયન્ત્યઃ var ઉચ્છ્વાસયન્ત્યઃ શ્લથબન્ધનાનિ
ગાત્રાણિ કન્દર્પસમાકુલાનિ ।
સમીપવર્તિષ્વપિ કામુકેષુસમીપવર્તિષ્વધુના પ્રિયેષુ
સમુત્સુકા એવ ભવન્તિ નાર્યઃ ॥ ૮॥

તનૂનિ પાણ્ડૂનિ સુકમ્પિતાનિ var મદાલસાનિ
મુહુર્મુહુર્જૃમ્ભણતત્પરાણિ ।

અઙ્ગાન્યનઙ્ગઃ પ્રમદાજનસ્ય
કરોત્યસૌ પ્રોષિતભર્તૃકસ્યકરોતિ લાવણ્યસસંભ્રમાણિ ॥ ૯॥

નેત્રેષુ લોલો મદિરાલસેષુ
ગણ્ડેષુ પાણ્ડુઃ કઠિનઃ સ્તનેષુ ।
મધ્યેષુ નમ્રોનિમ્નો જઘનેષુ પીનઃ
સ્ત્રીણામનઙ્ગો બહુધા સ્થિતોઽદ્ય ॥ ૧૦॥

અઙ્ગાનિ નિદ્રાલસિતાનિ નિત્યં var નિદ્રાલસવિભ્રમાણિ
વાક્યાનિ કિંચિન્મદિરાલસાનિ ।
ભ્રૂક્ષેપજિહ્માનિ વિલોચનાનિચ વીક્ષિતાનિ
કરોતિ કામઃ પ્રમદાજનાનામ્ ॥ ૧૧॥

પ્રિયઙ્ગુકાલીયકકુઙ્કુમાનિ var પ્રિયઙ્ગુકાલીયકકુઙ્કુમાક્તં
સ્તનેષુ ગૌરેષુ વિચર્ચિતાનિવિલાસિનીભિઃ ।
આરોપ્યતેઆલિપ્યતે ચન્દનમઙ્ગનાભિર્
મદાલસાભિર્મૃગનાભિયુક્તમ્ ॥ ૧૨॥

ગુરૂણિ વાસાંસિ વિહાય તૂર્ણં
તનૂનિ લાક્ષારસરઞ્જિતાનિ ।
સુગન્ધિકાલાગરુધૂપિતાનિ
ધત્તે જનઃ કામશરાનુવિદ્ધઃકામમદાલસાઙ્ગઃ ॥ ૧૩॥

પુંસ્કોકિલશ્ચૂતરસેન મત્તઃ var પુંસ્કોકિલશ્ચુતરસાસવેન
પ્રિયામુખં ચુમ્બતિ સાદરોઽયમ્મત્તઃ પ્રિયાં ચુમ્બતિ રાગહૃષ્ટઃ ।
ગુઞ્જદ્દ્વિરેફોઽપ્યયમમ્બુજસ્થઃ
પ્રિયં પ્રિયાયાઃ પ્રકરોતિ ચાટુ ॥ ૧૪॥

પ્રવાલતામ્રાસ્તબકાવનમ્રાશ્ var તામ્રપ્રવાલાસ્તબકાવનમ્રાશ્
ચૂતદ્રુમાઃ પુષ્પિતચારુશાખાઃ ।
કુર્વન્તિ કાન્તંકામં પવનાવધુતાઃ
સમુત્સુકત્વં મનસોઽઙ્ગનાનામ્પર્યુત્સુકં માનસમઙ્ગનાનાં ॥ ૧૫॥

આ મુલતો વિદ્રુમરાગતામ્રં
સપલ્લવં પુષ્પચયં દધાનાઃ ।
કુર્વન્ત્યશોકા હૃદયં સશોકં
નિરીક્ષ્યમાણા નવયૌવનાનામ્ ॥ ૧૬॥

મત્તદ્વિરેફપરિચુમ્બિતચારુપુષ્પા
મન્દાનિલાકુલિતચારુમૃદુપ્રવાલાઃમન્દાનિલાકુલિતનમ્રમૃદુપ્રવાલાઃ ।
કુર્વન્તિ કામિમનસાં સહસોત્સુકત્વં
બાલાતિમુક્તકલિકાઃબાલાતિમુક્તલતિકાઃ સમવેક્ષ્યમાણાઃ ॥ ૧૭॥

કાન્તામુખદ્યુતિજુષામચિરોદ્ગતાનાં
શોભાં પરાં કુરબકદ્રુમમઞ્જરીણામ્ ।
દૃષ્ટ્વા પ્રિયે પ્રિયતમારહિતસ્ય પુંસઃસહૃદયસ્ય ભવેન્ન કસ્ય
કન્દર્પબાણનિકરૈર્વ્યથિતં હિ ચેતઃકન્દર્પબાણપતનવ્યથિતં હિ ચેતઃ ॥ ૧૮॥

આદીપ્તવહ્નિસદૃશૈરપિ પારિજાતૈઃ var આદીપ્તવહ્નિસદૃશૈરપયાતપત્રૈઃ
સર્વત્ર કિંશુકવનૈઃ કુસુમાવનમ્રૈઃ ।
સદ્યો વસન્તસમયે સમુપાગતે ચવસન્તસમયેન સમાગતેયં
રક્તાંશુકા નવવધૂરિવ ભાતિ ભૂમિઃ ॥ ૧૯॥

કિં કિંશુકૈઃ શુકમુખચ્છવિભિર્ન દગ્ધં var ભિન્નં
કિં કર્ણિકારકુસુમૈર્ન કૃતં મનોજ્ઞમ્હૃતં મનોજ્ઞૈઃ ।
યત્ કોકિલઃ પુનરમીપુનરયં મધુરૈર્વચોભિર્
યૂનો મનઃ સુવદને નિયતં હરન્તિસુવદનાનિહિતં નિહન્તિ ॥ ૨૦॥

પુંસ્કોકિલૈઃ કલવચોભિરુપાત્થર્ષૈઃ
ગુઞ્જદ્ભિરુન્મદકલાનિ વચાંસિ પુંસામ્ભૃઙ્ગૈઃ ।
લજ્જાન્વિતં સવિનયં હૃદયં ક્ષણેન
પર્યાકુલં કુલગૃહેઽપિ કૃતં વધૂનામ્ ॥ ૨૧॥

આકમ્પયન્ કુસુમિતાં સહકારશાખાં var કુસુમિતાઃ સહકારશાખાઃ
વિસ્તારયન્ પરભૃતસ્ય વચાંસિ દિક્ષુ ।
વાયુર્વિવાતિ હૃદયાનિ હરન્ નરાણાં
નીહારપાતવિગમાત્ સુભગો વસન્તે ॥ ૨૨॥

કુન્દૈઃ સવિભ્રમવધૂહસિતાવદાતૈઃ
સંશોભિતાન્યુપવનાનિઉદ્યોતિતાન્યુપવનાનિ મનોહરાણિ ।
ચિત્તં મુનેરપિ હરન્તિ નિરસ્તરાગંનિવૃત્તરાગમ્
પ્રાગેવ રાગમલિનાનિ મનાંસિ પુંસામ્યૂનામ્ ॥ ૨૩॥

આલમ્બિહેમરશનાઃ સ્તનસક્તહારાઃ

કન્દર્પદર્પશિથિલીકૃતગાત્રયષ્ટ્યઃ ।
માસે મધૌ મધુરકોકિલભૃઙ્ગનાદૈર્
નાર્યો હરન્તિ હૃદયં પ્રસભં નરાણામ્ ॥ ૨૪॥

નાનામનોજ્ઞકુસુમદ્રુમપુષ્પિતાગ્રાન્ var નાનામનોજ્ઞકુસુમદ્રુમભૂષિતાન્તાન્
હૃષ્ટાન્યપુષ્ટકુલશોભિતસાનુદેશાન્હૃષ્ટાન્યપુષ્ટનિનદાકુલસાનુદેશાન્ ।
શૈલેયજાલપરિણદ્ધશિલાતલાન્તાન્
દૃષ્ટ્વા જનઃ ક્ષિતિભૃતો મદમેતિ સર્વઃ ॥ ૨૫॥

નેત્રે નિમીલયતિ રોદિતિ યાતિ મોહં var શોકં
ઘ્રાણં કરેણ વિરુણદ્ધિ વિરૌતિ ચોચ્ચૈઃ ।
કાન્તાવિયોગપરિખેદિતચિત્તવૃત્તિર્
દૃષ્ટ્વા જનઃદૃષ્ટ્વાધ્વગઃ કુસુમિતાન્ સહકારવૃક્ષાન્ ॥ ૨૬॥

સમદમધુકરાણાં કોકિલાનાં ચ નાદૈઃ
કુસૂમિતસહકારૈઃ કર્ણિકારૈશ્ચ રમ્યૈઃ ।
ઇષુભિરિવ સુતીક્ષ્ણૈર્માનસં કામિનીનાંમાનિનીનાં
તુદતિ કુસુમચાપોકુસુમમાસો મન્મથોદ્દીપનાય ॥ ૨૭॥

રુચિરકનકકાન્તં મુઞ્ચતઃ પુષ્પવૃન્દં
મૃદુપવનવિધૂતાન્ પુષ્પિતાંશ્ચૂતવૃક્ષાન્ ।
અભિમુખમભિવીક્ષ્ય ક્ષામદેહોઽપિ માર્ગે
મદનશરસુવિદ્ધો મોહમેતિ પ્રવાસી ॥ ૨૮॥પ્રક્ષિપ્તઃ
પરભૃતકલગીતૈર્હ્લાદિભિઃ સદ્વચાંસિ
સ્મિતદશનમયૂખં કુન્દપુષ્પપ્રભાભિઃ ।
સરકિસલયકાન્તિં પલ્લવૈર્વિદ્રુમાભૈર્
અભિભવતિ વસન્તઃ કામિનીનામિદાનીમ્ ॥ ૨૯॥પ્રક્ષિપ્તઃ
કનકકમલકાન્તૈર્ચન્દનૈઃ પાણ્ડુગણ્ડૈર્
ઉપનિહિતસુહારૈશ્ચન્દનાર્દ્રૈઃ સ્તનાગ્રૈઃ ।
મદનજનિતલાસૈઃ સાલસૈર્દૃષ્ટિપાતૈર્
મુનિવરમપિ નાર્યઃ કામયન્તે વસન્તે ॥ ૩૦॥પ્રક્ષિપ્તઃ
મધુસુરભિમુખાબ્જં લોચને લોલતારે
નવકુરબકપૂર્ણઃ કેશપાશો મનોજ્ઞઃ ।
અતિગુરુકુચયુગ્મં શ્રોણિબિમ્બં તથૈવ

ન ભવતિ કિમિદાનીં યોષિતાં બ્રૂહિ ચારુ ॥ ૩૧॥પ્રક્ષિપ્તઃ
આકમ્પિતાનિ હૃદયાનિ મનસ્વિનીનાં
વાતૈઃ પ્રફુલ્લસહકારકૃતાધિવાસૈઃ ।
ઉત્કૂજિતૈઃ પરભૃતસ્ય મદાકુલસ્ય
શ્રોત્રપ્રિયૈર્મધુકરસ્ય ચ ગીતશબ્દૈઃ ॥ ૩૨॥પ્રક્ષિપ્તઃ
રમ્યપ્રદોષસમયઃ સ્ફુટચન્દ્રભાસઃ
પુંસ્કોકિલસ્ય વિરુતં પવનઃ સુગન્ધિઃ ।
મત્તાલિયૂથવિરુતં નિશિ સીધુપાનં
સર્વં હિ સાધનમિદં કુસુમાયુધસ્ય ॥ ૩૩॥પ્રક્ષિપ્તઃ
આમ્રાશોકવિકલ્પિતાધરમધુર્મત્તદ્વિરેફસ્વનઃ
કુન્દાપીડવિશુદ્ધદન્તનિકરઃ પ્રોત્ફુલ્લપદ્માનનઃ ।
ચૂતામોદસુગન્ધિમન્દપવનઃ શૃઙ્ગારદીક્ષાગુરુઃ
કલ્પાન્તં મદનપ્રિયો દિશતુ વઃ પુષ્પાગમો મઙ્ગલમ્ ॥ ૩૪॥પ્રક્ષિપ્તઃ
આમ્રી મઙ્ગલમઞ્જરી વરશરઃ સત્કિંશુકં યદ્ધનુર્
જ્યા યસ્યાલિકુલમ્ કલઙ્કરહિતં છત્રં સિતાંશુઃ સિતમ્ ।
મત્તેભો મલયાનિલઃ પરભૃતા યદ્બન્દિનો લોકજિત્
સોઽયં વો વિતરીતરીતુ વિનતુર્ભદ્રં વસન્તાન્વિતઃ ॥ ૩૫॥

॥ ઇતિ વસન્તઃ ॥

Encoded by Jost Gippert gippert at em.uni-frankfurt.de
Proofread by Avinash Sathaye sohum at ms.uky.edu

*RitusanhAra (kAlidAsa)*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*